# Shri Shiva Sahasranama Stotra from Shivarahasya 92

# શ્રીશિવસહસ્રનામસ્તોત્રં શિવરહસ્યે નવમાંશે અધ્યાય ૨

## Document Information

Text title : shivasahasranAmastotram shivarahasyAntargatam navamA.nshe adhyAya 2

File name : shivasahasranAmastotramshivarahasya9p2.itx

Category : sahasranAma, shiva, shivarahasya

Location : doc_shiva

Transliterated by : Sivakumar Thyagarajan shivakumar24 at gmail.com

Proofread by : Sivakumar Thyagarajan shivakumar24 at gmail.com

Description-comments : shrIshivarahasyam | navamAMshaH | adhyAyaH 2| 1-142 ||

Source : Shivarahasya Navamanshe Chapter 2

Latest update : May 19, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 12, 2023

*sanskritdocuments.org*

# શ્રીશિવસહસ્રનામસ્તોત્રં શિવરહસ્યે નવમાંશે અધ્યાય ૨

શ્રીગણેશાય નમઃ ॥

॥ અથ નવમાંશે દ્વિતીયોઽધ્યાયઃ ॥

સ્કન્દ ઉવાચ -
શેષાશેષમુખોદ્ગીતાં નામસારાવલીમિમામ્ ।
હાટકેશોરુકટકભૂતેનકહીન(ન્દ્ર)કેણ તુ ॥ ૧॥

સહસ્રનામ યત્પ્રોક્તં તત્તે વક્ષ્યામ્યહં શ‍ૃણુ ।
ધન્યં માન્યં મહામન્યુપ્રીતિદાયકમુત્તમમ્ ॥ ૨॥

નાન્યેષુ દાપનીયં તે ન દેયં વેદમીદૃશમ્ ।
પઞ્ચાસ્ય હૃદયાશાસ્યમનુશાસ્યામિ તે હૃદિ ॥ ૩॥

ઋષિરસ્યાદિશેષો વૈ દેવો દેવોમહેશ્વરઃ ।
સર્વત્ર વિનિયોગોઽસ્ય કર્મસ્વપિ સદા દ્વિજ ।
ધ્યાનં તસ્યાનુવક્ષ્યામિ ત્વમેકાગ્રમનાઃ શ‍ૃણુ ॥ ૪॥

સ્કન્દઃ ઉવાચ -
ધ્યાયેદિન્દુકલાધરં ગિરિધનુ સોમાગ્નિફાલોજ્જ્વલં
વૈકુણ્ઠોરુવિપાઠબાણસુકરં દેવં રથેઽધિષ્ઠિતમ્ ।
વેદાશ્વં વિધિસારથિં ગિરિજયા ચિત્તેઽનુસન્દધ્મહે
નાનાકારકલાવિલાસજગદાન્દદિસમ્પૂર્તયે ॥

એવં ધ્યાત્વા મહાદેવં નામ્ના સાહસ્રમુત્તમમ્ ।
પ્રજપેન્નિયતો મન્ત્રી ભસ્મરુદ્રાક્ષભૂષણઃ ॥ ૧॥

લિઙ્ગમભ્યર્ચયન્વાપિ બિલ્વકોમલપલ્લવૈઃ ।
પઙ્કજૈરુત્પલૈર્વાપિ પ્રસાદાય મહેશિતુઃ ॥ ૨॥

અષ્ટમ્યાં વા ચતુર્દશ્યાં પર્વસ્વપિ વિશેષતઃ ।

યં યં કામં સદાચિત્તે ભાવયેત્તં તમાપ્નુયાત્ ॥ ૩॥

અથ સહસ્રનામ સ્તોત્રમ્ ।
ૐ ગઙ્ગાધરોઽન્ધકરિપુઃ પિનાકી પ્રમથાધિપન્ ।
ભવ ઈશાન આતાર્યોઽનેકધન્યો મહેશ્વરઃ ॥ ૧॥

મહાદેવઃ પશુપતિઃ સ્થાણુઃ સર્વજ્ઞ ઈશ્વરઃ ।
વિશ્વાધિકઃ શિવઃ શાન્તો વિશ્વાત્મા ગગનાન્તરઃ ॥ ૨॥

પરાવરોઽમ્બિકાનાથઃ શરદિન્દુકલાધરઃ ।
ગણેશતાતો દેવેશો ભવવૈદ્યઃ પિતામહઃ ॥ ૩॥

તરણસ્તારકસ્તામ્રો પ્રપઞ્ચરહિતો હરઃ ।
વિનાયકસ્તુતપદઃ ક્ષ્મારથો નન્દિવાહનઃ ॥ ૪॥

ગજાન્તકો ધનુર્ધારી વીરઘોષઃ સ્તુતિપ્રિયઃ ।
પ્રજાસહો રણોચ્ચણ્ડતાણ્ડવો મન્મથાન્તકઃ ॥ ૫॥

શિપિવિષ્ટઃ શાશ્વતાત્મા મેઘવાહો દુરાસદઃ ।
આનન્દપૂર્ણો વર્ષાત્મા રુદ્રઃ સંહારકારકઃ ॥ ૬॥

ભગનેત્રપ્રમથનો નિત્યજેતાઽપરાજિતઃ ।
મહાકારુણિકઃ શ્વભ્રુઃ પ્રસન્નાસ્યો મખાન્તકઃ ॥ ૭॥

ઘનાભકણ્ઠો ગરભુક્ બભ્લુશો વીર્યવર્ધનઃ ।
પ્રકટસ્તવનો માની મનસ્વી જ્ઞાનદાયકઃ ॥ ૮॥

કન્દર્પસર્પદર્પઘ્નો વિષાદી નીલલોહિતઃ ।
કાલાન્તકો યુગાવર્તઃ સઙ્ક્રન્દનસુનન્દનઃ ॥ ૯॥

દીનપોષઃ પાશહન્તા શાન્તાત્મા ક્રોધવર્ધનઃ ।
કન્દર્પો વિસલજ્જન્દ્રો લિઙ્ગાધ્યક્ષો ગજાન્તકઃ ॥ ૧૦॥

વૈકુણ્ઠપૂજ્યો વિશ્વાત્મા ત્રિણેત્રો વૃષભધ્વજઃ ।
જહ્નુજાપતિરીશાનઃ સ્મશાનનિલયો યુવા ॥ ૧૧॥

પાર્વતીજાનિરુહ્યાઢ્યો નાદ્યવિદ્યાપરાયણઃ ।
સામવેદપ્રિયો વૈદ્યો વિદ્યાધિપતિરીશ્વરઃ ॥ ૧૨॥

કુમારજનકો મારમારકો વીરસત્તમઃ ।
લમ્બલાશ્વતરોદ્ધારિસુફણોત્કૃષ્ટકુણ્ડલઃ ॥ ૧૩॥

આનન્દવનવાસોઽથ અવિમુક્તમહેશ્વરઃ ।
આઙ્કારનિલયો ધન્વી કદારેશોઽમિતપ્રભઃ ॥ ૧૪॥

નર્મદાલિઙ્ગનિલયો નિષ્પાપજનવત્સલઃ ।
મહાકૈલાસલિઙ્ગાત્મા વીરભદ્રપ્રસાદકૃત્ ॥ ૧૫॥

કાલાગ્નિરુદ્રોઽનન્તાત્મા ભસ્માઙ્ગો ગોપતિપ્રિયઃ ।
વેદાશ્વઃ કઞ્જજાજાનિનેત્રપૂજિતપાદુકઃ ॥ ૧૬॥

જલનધરવધોદ્યુક્તદિવ્યચક્રપ્રદાયકઃ ।
વામનો વિકટો મુણ્ડસ્તુહુણ્ડકૃતસંસ્તુતિઃ ॥ ૧૭॥

ફણીશ્વરમહાહારો રુદ્રાક્ષકૃતકઙ્કણઃ ।
વીણાપાણિર્ગાનરતો ઢક્કાવાદ્યપ્રિયો વશી ॥ ૧૮॥

વિશાલવક્ષાઃ શૈલેન્દ્રજામાતાઽમરસત્તમઃ ।
હૃત્તમોનાશકો બુદ્ધો જગત્કન્દાર્દનો બલી ॥ ૧૯॥

પલાશપુષ્પપૂજ્યાઙ્ઘ્રિઃ પલાશનવરપ્રદઃ ।
સાગરાન્તર્ગતો ઘોરઃ સદ્યોજાતોઽમ્બિકાસખઃ ॥ ૨૦॥

વામદેવઃ સામગીતઃ સોમઃ સોમકલાધરઃ ।
નિઃસીમ મહિમોદારો દૂ(દા)રિતાખિલપાતકઃ ॥ ૨૧॥

તપનાન્તર્ગતો ધાતા ધેનુપુત્રવરપ્રદઃ ।
બાણહસ્તપ્રદો નેતા નમુચેર્વીર્યવર્ધનઃ ॥ ૨૨॥

નાગાજિનાઙ્ગો નાગેશો નાગેશવરભુષણઃ ।
અગેશશાયી ભૂતેશો ગણકોલાહલપ્રિયઃ ॥ ૨૩॥

પ્રસન્નાસ્યોઽનેકબાહુઃ શૂલધૃક્ કાલતાપનઃ
કોલપ્રમથનઃ કૂર્મમહાખર્પટધારકઃ ॥ ૨૪॥

મારસિંહાજિનધરો મહાલાઙ્ગલધૃગ્બલી ।
કકુદ્મન્મથનો હેતુરહેતુઃ સર્વકારણઃ ॥ ૨૫॥

કૃશાનુરેતાઃ સોત્ફુલ્લભાલનેત્રોઽમરારિહા ।
મૃગબાલધરો ધન્વી શક્રબાહુવિભઞ્જકઃ ॥ ૨૬॥

દક્ષયજ્ઞપ્રમથનઃ પ્રમથાધિપતિઃ શિવઃ ।

શતાવર્તો યુગાવર્તો મેઘાવર્તો દુરાસદઃ ॥ ૨૭॥

મનોજવો જાતજનો વેદાધારઃ સનાતનઃ ।
પાણ્ડરાગોઃ(ઙ્ગો)ગોઽજિનાઙ્ગઃ કર્મન્દિજનવત્સલઃ ॥ ૨૮॥

ચાતુર્હોત્રો વીરહોતા શતરુદ્રીયમધ્યગઃ ।
ભીમો રુદ્ર ઉદાવર્તો વિષમાક્ષોઽરુણેશ્વરઃ ॥ ૨૯॥

યક્ષરાજનુતો નાથો નીતિશાસ્ત્રપ્રવર્તકઃ ।
કપાલપાણિર્ભગવાન્વૈયાઘ્રત્વગલઙ્કૃતઃ ॥ ૩૦॥

મોક્ષસારોઽધ્વરાધ્યક્ષ ધ્વજજીવો મરુત્સખઃ ।
આરુણોયસ્ત્વગધ્યક્ષો કામનારહિતસ્તરુઃ ॥ ૩૧॥

બિલ્વપૂજ્યો બિલ્વનીશો હરિદશ્વોઽપરાજિતઃ ।
બૃહદ્રથન્તરસ્તુત્યો વામદેવ્યસ્તવપ્રિયઃ ॥ ૩૨॥

અઘોરતર રોચિષ્ણુર્ગમ્ભીરો મન્યુરીશ્વરઃ ।
કલિપ્રવર્તકો યોગી સાઙ્ખ્યમાયાવિશારદઃ ॥ ૩૩॥

વિધારકો ધૈર્યધુર્યઃ સોમધામાન્તરસ્થિતઃ ।
શિપિવિષ્ટો ગહ્વરેષ્ટો જ્યેષ્ઠો દેવઃ કનિષ્ઠકઃ ॥ ૩૪॥

પિનાકહસ્તોઽવરજો વર્ષહરીશ્વરઃ ।
કવચી ચ નિષઙ્ગી ચ રથઘોષોઽમિતપ્રભઃ ॥ ૩૫॥

કાલઞ્જરો દન્દશૂકો વિદર્ભેશો ગણાતિગઃ ।
ગભસ્તીશો મુનિશ્રેષ્ઠો મહર્ષિઃ સંશિતવ્રતઃ ॥ ૩૬॥

કર્ણિકારવનાવાસી કરવીરસુમપ્રિયઃ ।
નીલોત્પલમહાસ્રગ્વી કરહાટપુરેશ્વરઃ ॥ ૩૭॥

શતર્ચનઃ પરાનન્દો બ્રાહ્મણાર્ચ્યોપવીતવાન્ ।
બલી બાલપ્રિયા ધર્મો હિરણ્યપતિરપ્પતિઃ ॥ ૩૮॥

યમપ્રમથનોષ્ણીષી ચક્રહસ્તઃ પુરાન્તકઃ ।
વસુષેણોઽઙ્ગનાદેહઃ કૌલાચારપ્રવર્તકઃ ॥ ૩૯॥

તન્ત્રાધ્યક્ષો મન્ત્રમયો ગાયત્રીમધ્યકઃ શુચિઃ ।
વેદાત્મા યજ્ઞસમ્પ્રીતો ગરિષ્ઠઃ પારદઃ કલી ॥ ૪૦॥

ઋગ્યજુઃસામરૂપાત્મા સર્વાત્મા ક્રતુરીશ્વરઃ ।
હિરણ્યગર્ભજનકો હિરણ્યાક્ષવરપ્રદઃ ॥ ૪૧॥

દમિતાશેષપાષણ્ડો દણ્ડહસ્તો દુરાસદઃ ।
દૂર્વાર્ચનપ્રિયકરો રન્તિદેવોઽમરેશ્વરઃ ॥ ૪૨॥

અમૃતાત્મા મહાદેવો હરઃ સંહારકારકઃ ।
ત્રિગુણો વિખના વાગ્મી ત્વઙ્માંસરુધિરાંશકઃ ॥ ૪૩॥

વત્સપ્રિયોઽથ સાનુસ્થો વિષ્ણૂ રક્તપ્રિયો ગુરુઃ ।
કિરાતવેષઃ શોણાત્મા રત્નગર્ભોઽરુણેક્ષણઃ ॥ ૪૪॥

સુરાસવબલિપ્રીતસ્તત્પૂર્ણોઽગન્ધદેહવાન્ ।
વ્યોમકેશઃ કોશહીનઃ કલ્પનારહિતોઽક્ષમી ॥ ૪૫॥

સહમાનશ્ચ વિવ્યાધી સ્ફટિકોપલનિર્મલઃ ।
મૃત્યુઞ્જયો દુરાધ્યક્ષો ભક્તિપ્રીતો ભયાપહઃ ॥ ૪૬॥

ગન્ધર્વગાનસુપ્રીતો વિષ્ણુગર્ભોઽમિતદ્યુતિઃ ।
બ્રહ્મસ્તુતઃ સૂર્યનેત્રો વીતિહોત્રોઽર્જુનાન્તકઃ ॥ ૪૭॥

ગર્વાપહારકો વાગ્મી કુમ્ભસમ્ભવપૂજિતઃ ।
મલયો વિન્ધ્યનિલયા મહેન્દ્રો મેરુનાયકઃ ॥ ૪૮॥

પાર્વતીનાયકોઽજય્યો જઙ્ગમાજઙ્ગમાશ્રયઃ ।
કુરુવિન્દોઽરુણો ધન્વી અસ્થિભૂષો નિશાકરઃ ॥ ૪૯॥

સમુદ્રમથનોદ્ભૂતકાલકૂટવિષાદનઃ ।
સુરાસુરેન્દ્રવરદો દયામૂર્તિઃ સહસ્રપાત્ ॥ ૫૦॥

કારણો વીરણઃ પુત્રી જન્તુગર્ભો ગરાદનઃ ।
શ્રીશૈલમૂલનિલયઃ શ્રીમદભ્રસભાપતિઃ ॥ ૫૧॥

દક્ષિણમૂર્તિરનઘો જલન્ધરનિપાતનઃ ।
દક્ષિણો યજમાનાત્મા દીક્ષિતો દૈત્યનાશનઃ ॥ ૫૨॥

કલ્માષપાદપૂજ્યાઙ્ઘ્રિરતિદો તુરગપ્રિયઃ ।
ઉમાધવો દીનદયો દાતા દાન્તો દયાપરઃ ॥ ૫૩॥

શ્રીમદ્દક્ષિણકૈલાસનિવાસો જનવત્સલઃ ।
દર્ભરોમા બલોન્નેતા તામસોઽન્નવિવર્ધનઃ ॥ ૫૪॥

નમસ્કારપ્રિયો નાથ આનન્દાત્મા સનાતનઃ ।
તમાલનીલસુગલઃ કુતર્કવિનિવારકઃ ॥ ૫૫॥

કામરૂપઃ પ્રશાન્તાત્મા કારણાનાં ચ કારણઃ ।
તૃણપાણિઃ કાન્તિપરો મણિપાણિઃ કુલાચલઃ ॥ ૫૬॥

કસ્તૂરીતિલકાક્રાન્તફાલો ભસ્મત્રિપુણ્ડ્રવાન્ ।
વારણાઙ્ગાલઙ્કૃતાઙ્ગો મહાપાપનિવારણઃ ॥ ૫૭॥

પ્રકાશરૂપો ગુહ્યાત્મા બાલરૂપો બિલેશયઃ ।
ભિક્ષુપ્રિયો ભક્ષ્યભોક્તા ભરદ્વાજપ્રિયો વશી ॥ ૫૮॥

કર્મણ્યસ્તારકોભૂત કારણો યાનહર્ષદઃ ।
વૃષગામી ધર્મગોપ્તા કામી કામાઙ્ગ નાશનઃ ॥ ૫૯॥

કારુણ્યો વાજરૂપાત્મા નિર્ધર્મો ગ્રામણીઃ પ્રભુઃ
અરણ્યઃ પશુહર્ષશ્ચ સૌનિકો મેઘવાહનઃ ॥ ૬૦॥

કુમારગુરુરાનન્દો વામનો વાગ્ભવો યુવા ।
સ્વર્ધુનીધન્યમૌલિશ્ચ તરુરાજો મહામનાઃ ॥ ૬૧॥

કણાશનસ્તામ્રઘનો મયપ્રીતોઽજરામરઃ ।
કૌણપારિઃ ભાલનેત્રો વર્ણશ્રમપરાયણઃ ॥ ૬૨॥

પુરાણવૃન્દસમ્પ્રીત ઇતિહાસવિશારદઃ ।
સમર્થો નમિતાશેષદેવો દ્યોતકરઃ ફણી ॥ ૬૩॥

કર્ષકો લાઙ્ગલેશશ્ચ મેરુધન્વા પ્રજાપતિઃ ।
ઉગ્રઃ પશુપતિર્ગોપ્તા પવમાનો વિભાવસુઃ ॥ ૬૪॥

ઉદાવસુર્વીતરાગ ઉર્વીશો વીરવર્ધનઃ ।
જ્વાલમાલોઽજિતાઙ્ગશ્ચ વૈદ્યુદગ્નિપ્રવર્તકઃ ॥ ૬૫॥

કમનીયાકૃતિઃ પાતા આષાઢો(ઢઃ)ષણ્ઢવર્જિતઃ ।
પુલિન્દરૂપઃ પુણ્યાત્મા પુણ્યપાપફલપ્રદઃ ॥ ૬૬॥

ગાર્હપત્યો દક્ષિણાગ્નિઃ સભ્યો વસથભૃત્કવિઃ ।
દ્રુમ આહવનીયશ્ચ તસ્કરોઽથ મયસ્કરઃ ॥ ૬૭॥

શાઙ્કુરો વારિદોઽવાર્યો વાતચક્રપ્રવર્તકઃ ।

કુલિશાયુધહસ્તશ્ચ વિકૃતો જટિલઃ શિખી ॥ ૬૮॥

સૌરાષ્ટ્રવાસી દેવેડ્યઃ સહ્યજાતીરસંસ્થિતઃ ।
મહાકાયો વીતભયો ગણગીતો વિશારદઃ ॥ ૬૯॥

તપસ્વી તાપસાચાર્યો દ્રુમહસ્તોજ્જ્વલત્પ્રભુઃ ।
કિન્દમો મઙ્કુણઃ પ્રીતો જાતુકર્ણિસ્તુતિપ્રિયઃ ॥ ૭૦॥

વેનો વૈન્યો વિશાખશ્ચાઽકમ્પનઃ સોમધારકઃ ।
ઉપાયદો દારિતાઙ્ગો નાનાગમવિશારદઃ ॥ ૭૧॥

કાવ્યાલાપૈકકુશલો મીમાંસાવલ્લભો ધ્રુવઃ ।
તાલમૂલનિકેન્તશ્ચ બિલ્વમૂલપ્રપૂજિતઃ ॥ ૭૨॥

વેદાઙ્ગો ગમનોઽગમ્યો ગવ્યઃ પ્રાતઃ ફલાદનઃ ।
ગઙ્ગાતીરસ્થિતો લિઙ્ગી અલિઙ્ગો રૂપસંશ્રયઃ ॥ ૭૩॥

શ્રાન્તિહા પુણ્યનિલયઃ પલલાશોઽર્કપૂજિતઃ ।
મહેન્દ્રવિષ્ણુજનકો બ્રહ્મતાતસ્તુતોઽવ્યયઃ ॥ ૭૪॥

કર્દમેશો મતઙ્ગેશો વિશ્વેશો ગન્ધધારકઃ ।
વિશાલો વિમલો જિષ્ણુર્જયશીલો જયપ્રદઃ ॥ ૭૫॥

દારિદ્ર્યમથનો મન્ત્રી શમ્ભુઃ શશિકલાધરઃ ।
શિંશુમારઃ શૌનકેજ્યઃ શ્વાનપઃ શ્વેતજીવદઃ ॥ ૭૬॥

મુનિબાલપ્રિયોઽગોત્રો મિલિન્દો મન્ત્રસંસ્થિતઃ ।
કાશીશઃ કામિતાઙ્ગશ્ચ વલ્લકીવાદનપ્રિયઃ ॥ ૭૭॥

હલ્લીસલાસ્યનિપુણઃ સલ્લીલો વલ્લરીપ્રિયઃ ।
મહાપારદસંવીર્યો વહ્નિનેત્રો જટાધરઃ ॥ ૭૮॥

આલાપોઽનેકરૂપાત્મા પુરુષઃ પ્રકૃતેઃ પરઃ ।
સ્થાણુર્વેણુવનપ્રીતો રણજિત્પાકશાસનઃ ॥ ૭૯॥

નગ્નો નિરાકૃતો ધૂમ્રો વૈદ્યુતો વિશ્વનાયકઃ ।
વિશ્વાધિકઃ શાન્તરવઃ શાશ્વતઃ સુમુખો મહાન્ ॥ ૮૦॥

અણોરણુઃ શ્વભ્રગતઃ [તોહ્ય] અવટેશો નટેશ્વરઃ ।
ચિત્રધામા ચિત્રભાનુર્વિચિત્રાકૃતિરીશ્વરઃ ॥ ૮૧॥

ઇન્દ્રોઽજોઽમૂર્તિરૂપાત્મા[હ્ય]અમૂર્તો વહ્નિધારકઃ ।
અપસ્મારહરો ગુપ્તો યોગિધ્યેયોઽખિલાદનઃ ॥ ૮૨॥

નક્ષત્રરૂપઃ ક્ષત્રાત્મા ક્ષુતૃષ્ણાશ્રમવર્જિતઃ ।
અસઙ્ગો ભૂતહૃદયો વાલખિલ્યો મરીચિપઃ ॥ ૮૩॥

પઞ્ચપ્રેતાસનાસીનો યોગિનીકણસેવિતઃ ।
નાનાભાષાનુચતો [નુવચનો] નાનાદેશસમાશ્રયઃ ॥ ૮૪॥

વૃન્દારકગણસ્તુત્યઃ પુરન્દરનતિપ્રિયઃ ।
પ્રઘસો વિઘસાશી ચ [ચાપ્ય] અત્રાધિપતિરન્નદઃ ॥ ૮૫॥

પન્નગાભરણો યોગી ગુરુર્લૌકિકનાયકઃ ।
વિરાજો વિશ્વતોધર્મી બભ્લુશો બાહુકપ્રિયઃ ॥ ૮૬॥

પ્રધાનનિપુણો મિત્રો હ્યૂર્ધ્વરેતા મહાતપાઃ ।
કુરુજાઙાગલવાસી ચ નિત્યતૃપ્તો નિરઞ્જનઃ ॥ ૮૭॥

હિરણ્યગર્ભો ભૂતાદિસ્વરાટ્ સમ્રાડ્વિરાડ્વૃદુઃ ।
પટહધ્વનિસમ્પ્રીતો નતમુક્તિપ્રદાયકઃ ॥ ૮૮॥

ફલપ્રદઃ ભાલનેત્રઃ ફણીશ્વરમહાઙ્ગધૃક્ ।
વાસ્તુપો વાસવો વાત્યા વર્મભિદ્ભસનોજ્જ્વલઃ ॥ ૮૯॥

મીઢુષ્ટમઃ શિવતમો વસુઃ શિવતરો બલી ।
નિધનેશો નિધાનેશઃ પુરાજિદ્રાષ્ટ્રવર્ધનઃ ॥ ૯૦॥

અયુતાયુઃ શતાયુશ્ચ પ્રમિતાયુઃ શતાધ્વરઃ ।
સહસ્રશ ૃઙ્ગો વૃષભ ઉરુગાયોરુમીઢુકઃ ॥ ૯૧॥

ગન્તા ગમયિતા ગાતા ગરુત્માન્ ગીતવર્ધનઃ ।
રાગરાગિણિકાપ્રતિસ્તાલપાણિર્ગદાપહઃ ॥ ૯૨॥

દેવેશઃ ખણ્ડપરશુઃ પ્રચણ્ડતરવિક્રમઃ ।
ઉરુક્રમો મહાબાહુર્હેતિધૃક્પાવકાદનઃ ॥ ૯૩॥

ગણિકાનાટ્યનિરતો વિમર્શો વાવદૂકકઃ ।
કલિપ્રમથનો ધીરો ધીરોદાત્તો મહાહનુઃ ॥ ૯૪॥

ક્ષયદ્વીરોમુઞ્ચિ(મઞ્જુ)કેશ કલ્મલીકઃ (કી) સુરોત્તમઃ ।
વજ્રાઙ્ગો વાયુજનકો હ્યષ્ટમૂર્તિઃ કૃપાકરઃ ॥ ૯૫॥

પ્રહૂતઃ પરમોદારઃ પઞ્ચાક્ષરપરાયણઃ ।
કર્કન્ધુઃ કામદહનો મલિનાક્ષો જડાજડઃ ॥ ૯૬॥

કુબેરપૂજિતપદો મહાતક્ષકકઙ્કણઃ ।
શઙ્ખણો મધુરારાવો મૃડઃ સસ્પિઞ્જરોઽજરઃ ॥ ૯૭॥

માર્ગો માર્ગપ્રદો મુક્તો વિજિતારિઃ પરોઽવરઃ ।
પ્રણવાર્થો વેદમયો વેદાન્તામ્બુજ ભાસ્કરઃ ॥ ૯૮॥

સર્વવિદ્યાધિપઃ સૌમ્યો યજ્ઞેશઃ ક્ષેત્રનાયકઃ ।
પાપનાશકરો દિવ્યો ગોભિલો ગોપરો ગણઃ ॥ ૯૯॥

ગણેશપૂજિતપદો લલિતામ્બામનોહરઃ ।
કક્ષવાસો મહોક્ષાઙ્કો નિસ્તમસ્તોમવર્જિઃ ॥ ૧૦૦॥

નિઃસીમમહિમોદારઃ પ્રભામૂર્તિઃ પ્રસન્ન(દૃ)ક્ ।
સ્તોભ પ્રીતો ભારભૂતો ભૂભારહરણઃ સ્થિરઃ ॥ ૧૦૧॥

ક્ષરાક્ષરોધરો ધર્તા સાગરાન્તર્ગતો વશી ।
રમ્યો રસ્યો રજસ્યોઽથ પ્રવાહ્યો વૈદ્યુતોઽનલઃ ॥ ૧૦૨॥

સિકત્યો વાદ્ય ઉર્વર્યો મેધ્ય ઈધ્રિય વાક્પટુઃ ।
પ્રપઞ્ચમાયારહિતઃ કીર્તિદો વીર્યવર્ધનઃ ॥ ૧૦૩॥

કાલચક્રાન્તરહિતો નિત્યાનિત્યોઽથ ચેતનઃ ।
ગર્વોન્નતો ભટાકારો મૃગયુર્ભવહા ભવઃ ॥ ૧૦૪॥

શઙ્ગઃ શતાઙ્ગઃ શીતાઙ્ગો નાગાઙ્ગો ભસ્મભૂષણઃ ।
ત્રિયમ્બકોઽમ્બિકાભર્તા નન્દિકેશઃ પ્રસાદકૃત્ ॥ ૧૦૫॥

ચણ્ડીશવરદો દિવ્યો માયાવિદ્યાવિશારદઃ ।
મૃગાઙ્કશેખરો ભવ્યો ગૌરીપૂજ્યો દયામયઃ ॥ ૧૦૬॥

પ્રમાથનોઽવિકથનો ગર્ગો વીણાપ્રિયઃ પટુઃ ।
વર્ણી વનસ્થો યતિરાટ્ ગૂઢગર્ભો વિરોચનઃ ॥ ૧૦૭॥

શબરો બર્બરો ધૌમ્યો વિરાડૂપઃ સ્થિતિપ્રદઃ ।
મહાકારુણિકો ભ્રાન્તિનાશકઃ શોકહા પ્રભુઃ ॥ ૧૦૮॥

અશોકપુષ્પપૂજ્યાઙ્ઘ્રિર્મણિભદ્રો ધનેશ્વરઃ ।

અમૃતેશોદ્રુતગતિ સ્તગરોઽર્જુનમધ્યગઃ ॥ ૧૦૯॥

દમો વિરોધહૃત્કાન્તો નીતિજ્ઞો વિષ્ણુપૂજિતઃ ।
સુમપ્રિયો વાતમયો વરીયાન્કર્મઠો યમઃ ॥ ૧૧૦॥

દિગમ્બરો(રઃ) શમમયો ધૂમપઃ શુક્રગર્ભકઃ ।
અટ્ટહાસોઽતલ્પશય આસીનો ધાવમાનકઃ ॥ ૧૧૧॥

તુરાષાણ્મેઘમધ્યસ્થો વિપાશાતીરસંસ્થિતઃ ।
કુલોન્નતઃ કુલીનશ્ચ વ્યવહારપ્રવર્તકઃ ॥ ૧૧૨॥

કેતુમાલો હરિદ્રાઙ્ગો દ્રાવિ(વી) પુષ્પમયો ભૃગુઃ ।
વિશોષકોર્વીનિરતસ્ત્વગ્જાતો રુધિક(ર)પ્રિયઃ ॥ ૧૧૩॥

અકૈતક(વ)હૃદાવાસઃ ક્ષપાનાથકલાધરઃ ।
નક્તઞ્ચરોદિવાચારી દિવ્યદેહો વિનાશકઃ ॥ ૧૧૪॥

કદમ્બવનમધ્યસ્થો હરિદ્રાઙ્ગોર્મિમધ્યગઃ ।
યમુનાજલમધ્યસ્થો જાલકોઽજમખો વસુઃ ॥ ૧૧૫॥

વસુપ્રદ વીરવર્યઃ શૂલહસ્તઃ પ્રતાપવાન્ ।
ખડ્ગહસ્તો મણ્ડલાત્મા મૃત્યુર્મૃત્યુજિદીશ્વરઃ ॥ ૧૧૬॥

લઙ્કાવાસો મેઘમાલી ગન્ધમાદનસંસ્થિતઃ ।
ભૈરવો ભરણો ભર્તા ભ્રાતૃવ્યો નામરૂપગઃ ॥ ૧૧૭॥

અવ્યાકૃતાત્મા ભૂતાત્મા પઞ્ચભૂતાન્તરોઽસ્મયઃ ।
અહનન્યઃ શબ્દમય કાલાધરઃ કલાધરઃ ॥ ૧૧૮॥

ભૃગુતુઙ્ગશ્ચીરવાસી(સાઃ) કૈવર્તોઽનાયકોઽર્ધકઃ ।
કરેણુપો ગન્ધમદશ્ચામ્પેયકુસુમપ્રિયઃ ॥ ૧૧૯॥

ભદ્રદશ્ચર્મવસનો વૈરાજસ્તોત્રકારકઃ ।
સુમપ્રીતઃ સામગીતી ઉર્જો વર્ચઃ કુલેશ્વરઃ ॥ ૧૨૦॥

કકુદ્માન્ પીતવસનો વધ્યેશો નારદઃ પિતા ।
ક્રવ્યાદનો નીતિમયો ધર્મચક્રપ્રવર્તકઃ ॥ ૧૨૧॥

શષ્પ્યઃ ક્રૈન્ચો વિનીર્ણેતા કઙ્કણોઽનાસિકોઽચલઃ ।
એણાઙ્કઃ શલભાકાર ઃ શાલુરો ગ્રામસંસ્થિતઃ ॥ ૧૨૨॥

મહાવિશેષકથનો વારિતીરાસ્થિતોઽચલઃ ।
કૃપીટયોનિઃ શાન્તાત્મા ગુણવાન્ જ્ઞાનવાઞ્છુચિઃ ॥ ૧૨૩ ॥

સર્વપાપહરોઽલિઙ્ગો ભગમાલોઽપ્રતારણઃ ।
આનન્દઘન આતાર્ય ઇરિણ્યોઽથપ્રપથ્યકઃ ॥ ૧૨૪ ॥

ગઙ્ગાતીરસ્થિતો દેવો હ્યવિમુક્તસમાશ્રયઃ ।
મહાસ્મશાનનિલયોઽવલયો વાલિપૂજિતઃ ॥ ૧૨૫ ॥

કરન્ધમો વ્રાત્યવર્યો માનવો જીવકોઽશઠઃ ।
કર્મદેવમયો બ્રહ્મા ઋતં સત્યં મહેશ્વરઃ ॥ ૧૨૬ ॥

સુમઙ્ગલઃ સુખમયો જ્ઞાનાનન્દોઽમિતાશનઃ ।
મનોમયઃ પ્રાણમયો વિજ્ઞાનાત્મા પ્રસાદનઃ ॥ ૧૨૭ ॥

આનન્દમયકોશાત્મા ધર્મસીમાથ ભૂમકઃ ।
સદાશિવો વિશિષ્ટાત્મા વસિષ્ઠાર્ચિતપાદુકઃ ॥ ૧૨૮ ॥

નીલગ્રીવઃ સૈન્યપાલો દિશાનાથો નતિપ્રિયઃ ।
કેશવોન્મથનો મૌની મધુસૂદનસૂદનઃ ॥ ૧૨૯ ॥

ઉદુમ્બરકરો ડિમ્ભો બમ્ભરઃ પિઞ્છિલાતલઃ ।
મૂલસ્તાલકરો વર્ણ્યોઽપર્ણાદઃ પ્રાણમાશ(ષ)કઃ ॥ ૧૩૦ ॥

અપર્ણાપતિરીશાસ્યોઽસમ્પૂર્ણઃ પૂર્ણરૂપવાન્ ।
દીપમાલો જાઙ્ગલિકો વૈતુણ્ડસ્તુણ્ડકઃ પ્રિયઃ ॥ ૧૩૧ ॥

ઊલુકઃ કલવિઙ્કોઽથ શુકનાદપ્રસાદકૃત્ ।
જૈગીષવ્યતપઃપ્રીતો રાવણેન્દ્રબલાર્દનઃ ॥ ૧૩૨ ॥

માર્કણ્ડેયમહામૃત્યુનાશકો જ્ઞાનધારકઃ ।
અહર્ગણક્રિયાતીતઃ સર્પપ્રીતોઽનિલાશનઃ ॥ ૧૩૩ ॥

વેગાધારો ધૈર્યધનો ધનધાન્યપ્રદાયકઃ ।
નાદ્યો વૈદ્યો વાદ્યરતો ગદ્યપદ્યસ્તુતો દ્યુકઃ ॥ ૧૩૪ ॥

ભેરીભાઙ્કારનિરતો મૃગચર્મવિધાયકઃ ।
પુણ્યકીર્તિઃ પુણ્યલભ્યો મોહનાસ્રો(સ્ત્ર)વિશારદઃ ॥ ૧૩૫ ॥

કૈલાલશિખરાવાસઃ પારિજાતવનાશ્રયઃ ।
ઈલા(ડા)દિરવસમ્પ્રીતો માહેન્દ્રસ્તુતિહર્ષિતઃ ॥ ૧૩૬ ॥

યૂપવાટો ભાર વહઃ કોમલાઙ્ગો જનાશ્રયઃ ।
વિશ્વામિત્રપ્રિયો બાલઃ પાકયજ્ઞરતઃ સુખી ॥ ૧૩૭॥

વામાચારપ્રિયોન્નેતા શક્તિહસ્તો દુરાસદઃ ।
સર્વાકારઃ શાશ્વતત્મા વાઙ્મનોદૂરગો હરઃ ॥ ૧૩૮॥

સ્કન્દ ઉવાચ -
ઇત્યેતન્નામસાહસ્રં શેષાશેષમુખોદ્ગતમ્ ।
શમ્ભોર્દિવ્યં મુનિશ્રેષ્ઠ શ્રવણાત્પાપનાશનમ્ ॥ ૧૩૯॥

સર્વાન્કામાનવાપ્નોતિ શિવાર્ચનપરાયણઃ ।
ત્વમેભિર્મુનિમુખ્યૈશ્ચ શ્ૃણ્વન્ભક્તિમવાપ્નુયાઃ ॥ ૧૪૦॥

કુમારી પતિમાપ્નોતિ નિર્ધનો ધનવાન્ભવેત્ ।
જયાર્થી જયમાપ્નોતિ ક્ષયદ્વીરપ્રસાદતઃ ॥ ૧૪૧॥

સ્કન્દ ઉવાચ -
ઇતિ તવ ગદિતં મે નામસાહસ્રમેતત્
હરવરચરણાબ્જારાધને સાધનં તે ।
(મુનિગણવરબાણાદ્યૈ)
મુનિજનગણવર્યૈર્ધાર્યમેતત્સુરાદ્યૈઃ
પરમપદમવાપ્નુઃ (પ્નું) શઙ્કરાજ્ઞાવશેનઃ ॥ ૧૪૨॥

॥ ઇતિ શ્રીશિવરહસ્યે નવમાંશે સહસ્રનામકથનં નામ દ્વિતીયોઽધ્યાયઃ ॥

શ્રીશિવરહસ્યમ્ । નવમાંશઃ । અધ્યાયઃ ૨। ૧-૧૪૨ ॥

- shrIshivarahasyam . navamAMshaH . adhyAyaH 2. 1-142 ..

Pરૂફ઼્ર્રેઅદ્ બ્ય્ ષિવકુમર્ ઠ્યગરજન્ શિવકુમર્૨૪ અત્ ગ્મૈલ્ૅઓમ્ અન્દ્ ડ્Pડ્

*Shri Shiva Sahasranama Stotra from Shivarahasya 92*

pdf was typeset on May 12, 2023

Please send corrections to *sanskrit@cheerful.com*